॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## गणपति अथर्व शीर्ष

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# गणपति अथर्व शीर्ष

अथ श्रीगणपत्यथर्वशीर्षम्

## शांति मंत्र

ॐ भद्रं(ङ्) कर्णेभिः(श्) शृणुयाम देवा। भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवां(व्)सस्तनूभिः व्यशेम देवहितं यदायुः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः(फ्) पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः(श्) शान्तिः(श्) शान्तिः ॥

## मूल मंत्र

ॐ नमस्ते गणपतये ।

त्वमेव प्रत्यक्षं(न्) तत्त्वमसि ।

त्वमेव केवलं(ङ्) कर्तासि ।

त्वमेव केवलं(न्) धर्तासि ।

त्वमेव केवलं(म्) हर्तासि ।

त्वमेव सर्वं(ङ्) खल्विदं ब्रह्मासि ।

त्वं साक्षादात्मासि नित्यम् ॥ 1॥

## स्वरूप तत्त्व

ऋतं वच्मि। सत्यं वच्मि ॥ 2॥

अव त्वं माम्। अव वक्तारम् । अव श्रोतारम् ।
अव दातारम् ।अव धातारम् ।
अवानूचानमव । अव शिष्यम् ।
अव पश्चात्तात् ।अव पुरस्तात् । अवोत्तरात्तात् ।

अव दक्षिणात्तात्। अव चोर्ध्वात्तात् ।
अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात् ॥ 3॥

त्वं(म्) वाङ्मयस्त्वं(ञ्) चिन्मयः ।
त्वमानन्दमयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानन्दाद्वितीयोऽसि ।
त्वं(म्) प्रत्यक्षं ब्रह्मासि ।
त्वं(ञ्) ज्ञानमयो विज्ञानमयोऽसि ॥ 4॥

सर्वं(ञ्) जगदिदं(न्) त्वत्तो जायते ।
सर्वं(ञ्) जगदिदं(न्) त्वत्तस्तिष्ठति ।
सर्वं(ञ्) जगदिदं(न्) त्वयि लयमेष्यति ।
सर्वं(ञ्) जगदिदं(न्) त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभः ।
त्वं(ञ्) चत्वारि वाक्पदानि ॥ 5॥

त्वं(ङ्) गुणत्रयातीतः । त्वं(ङ्) कालत्रयातीतः ।
त्वं(न्) देहत्रयातीतः ।त्वं मूलाधारस्थितोऽसि नित्यम् ।
त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम् ।
त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं(ञ्) चन्द्रमास्त्वं ब्रह्म भूर्भुवः(स्) स्वरोम् ॥ 6॥

## गणेश मंत्र

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः(फ्) परतरः ।
अर्धेन्दुलसितम् । तारेण रुद्धम् । एतत्तव मनुस्वरूपम् ।

गकारः(फ्) पूर्वरूपम् । अकारो मध्यमरूपम् ।
अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम्।
नादः(स्) सन्धानम् । सं(व्)हिता सन्धिः ।
सैषा गणेशविद्या । गणक ऋषिः निचृद्गायत्री छन्दः ।
श्रीमहागणपति। ॐगं(ङ्) गणपतये नमः ॥ 7॥

## गणेश गायत्री

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ 8॥

## गणेश रूप

एकदन्तं(ञ्) चतुर्हस्तं, पाशमङ्कुशधारिणम् ।
रदं(ञ्) च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं, रक्तपुष्पैः(स्) सुपूजितम् ।
भक्तानुकम्पिनं(न्) देवं(ञ्) जगत्कारणमच्युतम् ।
आविर्भूतं(ञ्) च सृष्ट्यादौ प्रकृतेः(फ्) पुरुषात्परम् ।
एवं(न्) ध्यायति यो नित्यं स योगी योगिनां वरः ॥ 9 ॥

## अष्ट नाम गणपति

नमो व्रातपतये नमो गणपतये नमः(फ्) प्रमथपतये नमस्तेऽस्तु
लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥10॥

## फलश्रुति

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते ।
स सर्वविघ्नैर्न बाध्यते ।

स सर्वतः(स्) सुखमेधते स पञ्चमहापापात् प्रमुच्यते ।
सायमधीयानो दिवसकृतं पापं(न्) नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं(न्) नाशयति ।
सायं प्रातः(फ्) प्रयुञ्जानो पापोऽपापो भवति ।
सर्वत्राधीयानोऽपविघ्नो भवति धर्मार्थकाममोक्षं(ञ्) च विन्दति ।
इदमथर्वशीर्षमशिष्याय न देयम् ।
यो यदि मोहाद्दास्यति स पापीयान् भवति ।
सहस्रावर्तनाद् यं यं(ङ्) काममधीते तं(न्) तमनेन साधयेत् ॥ 11॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति ।
चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति।
इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यात् ।
न बिभेति कदाचनेति ॥ 12॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति ।
यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति ।
यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति ।
यः(स्) साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ 13॥

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ।
सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा ।
सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते ।
महापापात् प्रमुच्यते। महादोषात् प्रमुच्यते ।
स सर्वविद्भवति। य एवं वेद ॥ 14॥

इत्युपनिषत् ॥

ॐ शान्तिः(श्) शान्तिः(श्) शान्तिः ॥
इति श्रीगणपत्यथर्वशीर्षम्